
# 9

# समासा:



(अध्यापक: कक्षायां प्रविशति। छात्रा: उत्थाय अभिवादनं कुर्वन्ति।

अध्यापक: – (एकं छात्रम् उद्दिश्य) पङ्कज! किमर्थं खिन्न: इव दृश्यते?

पङ्कज: – गुरुवर! एष शुभङ्कर: माम् सर्वदा 'पङ्के जात:' इति सम्बोधयति। न रोचते एतत् मह्यम्।

मनोज: – आम् गुरुवर! एष: माम् अपि 'मनसि जायते' इति उपहसति।

यशोदा – परम् यदा एष: माम् 'यश: ददाति या' इति कथयति तदा अहं तु प्रसन्ना भवामि।

घनश्याम: – माम् अपि एष: 'घन इव श्याम:' इति कथयति।

सुरेश: – माम् तु एष 'सुराणाम् ईश:' इति कथयति।

सर्वे छात्रा: – गुरुवर! कृपया एनम् अवबोधयतु येन स: एवं मा व्यवहरेत्।

अध्यापक: – (विहस्य) शुभङ्कर! किं त्वम् आत्मन: नाम अपि 'शुभं करोति' इति एवम् उच्चारयसि?

(सर्वे छात्रा: उच्चै: हसन्ति।)

अध्यापक: – भो छात्रा:! भवताम् नाम्न: कृते शुभङ्कर: यानि कानि अपि पदानि प्रयोजयति तानि न कथमपि अनुचितानि। वस्तुत: स: युष्माकं नाम्न: विग्रहम् एव प्रयोजयति।

© NCERT not to be republished

छात्रा: – कृपया विस्तरेण बोधयन्तु।

अध्यापक: – बाढम्। ध्यानेन एतत् कथनं शृणुत- एकदा नीले अक्षिणी यस्या: सा माता च पिता च, तौ प्रणम्य लम्बम् उदरम् यस्य तम् घन इव श्यामम्, पार्वती च परमेश्वर: च, तौ प्रणतवती, गृहस्य उद्याने विशालं च तत् वृक्षम् आरूढम् एकं वानरम् अपश्यत्।

छात्रा: – गुरुवर! भवत: कथनम् अवगन्तुम् अक्षमा: वयम्।

अध्यापक: – अधुना पुन: शृणुत- एकदा नीलाक्षी पितरौ प्रणम्य लम्बोदरं घनश्यामं पार्वतीपरमेश्वरौ च प्रणतवती। तत: गृहोद्याने विशालवृक्षारूढम् एकं वानरम् अपश्यत्।

प्रथमं मया यानि पदानि प्रयुक्तानि तानि विग्रहवाक्यानि आसन्। पुन: मया तत्स्थाने समस्तपदानि प्रयुक्तानि। एतद्विषयं विस्तरेण एवम् अवगच्छाम: - यदा अनेकपदानां स्थाने विभक्तिलोपं कृत्वा एकपदं प्रयुज्यते तदा तत् पदं समस्तपदं भवति। समासप्रक्रियायाम् अनेन भाषासौष्ठवं लाघवं च परिज्ञायते। कथितमस्ति - **'समसनं समास:।'**

समासस्य मुख्यत: चत्वार: भेदा: सन्ति - अव्ययीभाव:, तत्पुरुष:, द्वंद्व:, बहुव्रीहिश्च। तत्पुरुषस्य अन्ये द्वे मुख्ये भेदे अपि स्त: - द्विगु: कर्मधारयश्च। एतदतिरिक्तम् अलुक्, नञ्, उपपद तत्पुरुष: च अस्य भेदा: भवन्ति।

अस्मिन् अध्याये वयम् केवलं तत्पुरुष-द्विगु-द्वंद्व समासानां विशिष्टम् अभ्यासं करिष्याम:।

**तत्पुरुष: समास:**

**(उत्तरपदप्रधान: तत्पुरुष:)**

अस्मिन् समासे उत्तरपदं प्रधानं भवति। विग्रहे पूर्वपदेन सह विभक्तिप्रयोग: भवति। विग्रहे या विभक्ति: प्रयुज्यते तया नाम्ना एवास्य तत्पुरुष-समासस्य नाम भवति।

यथा —

| **समस्तपदानि** | **विग्रह:** | |
|---|---|---|
| शरणागत: | शरणम् आगत: | द्वितीय-तत्पुरुष: |
| हरित्रात: | हरिणा त्रात: | तृतीया-तत्पुरुष: |
| पाकशाला | पाकाय शाला | चतुर्थी-तत्पुरुष: |
| रोगमुक्त: | रोगात् मुक्त: | पञ्चमी-तत्पुरुष: |
| राजपुरुष: | राज्ञ: पुरुष: | षष्ठी-तत्पुरुष: |
| जलमग्न: | जले मग्न: | सप्तमी-तत्पुरुष: |
| युधिष्ठिर: | युधि स्थिर: | अलुक्-तत्पुरुष: |

| | | |
|---|---|---|
| कुम्भकारः | कुम्भं करोति इति | उपपद-तत्पुरुषः |
| अज्ञानम् | न ज्ञानम् इति | नञ्-तत्पुरुषः |

- नञ्-तत्पुरुषे यदि पदस्य प्रथमवर्णः स्वरः भवति तदा समस्तपदे 'न' स्थाने 'अन' प्रयुज्यते परं यदि शब्दस्य प्रथमवर्णं व्यञ्जनं भवति तदा 'न' स्थाने 'अ' प्रयुज्यते।

## द्विगुः समासः
## (संख्यापूर्वो द्विगुः)

यस्मिन् समासे प्रथमपदं संख्यावाचि भवति समाहारस्य (एकत्रीकरणस्य) च भावः अस्ति सः द्विगुसमासः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहारः |
| चतुर्युगम् | चतुर्णां युगानां समाहारः |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |
| अष्टाध्यायी | अष्टानाम् अध्यायानां समाहारः |

## द्वंद्व-समासः
## (उभयपदार्थप्रधानो द्वंद्वः)

द्वंद्वसमासे उभयोः पदयोः प्रधानता भवति। विग्रहे प्रतिपदं पश्चात् 'च' इति पदस्य प्रयोगः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| रामकृष्णौ | रामः च कृष्णः च |
| पितरौ/मातापितरौ | माता च पिता च |
| कन्दमूलफलानि | कन्दं च मूलं च फलं च |
| पाणिपादम् | पाणिः च पादौ च |

## अभ्यासः

**1. प्रदत्तपदानां विग्रहं कृत्वा समासनाम लिखत —**

| **समस्तपदम्** | **विग्रहः** | **नाम** |
|---|---|---|
| **विद्यालयः** | **विद्यायाः आलयः** | **तत्पुरुषः** |
| i. सप्तर्षिः | ........................ | ........................ |
| ii. खलसज्जनौ | ........................ | ........................ |

© NCERT not to be republished

iii. गृहोद्याने ........................ ........................

iv. विभवहीना: ........................ ........................

v. चतुर्भुजम् ........................ ........................

vi. पत्रपुष्पे ........................ ........................

vii. लौहघटिता ........................ ........................

viii. खगोत्तम: ........................ ........................

ix. सुखदु:खे ........................ ........................

x. त्रिलोकी ........................ ........................

**2. प्रदत्तपदेषु समासं कृत्वा समासनाम लिखत —**

| **विग्रह:** | **समस्तपदम्** | **नाम** |
|---|---|---|
| **कुसुमानाम् अवलि:** | **कुसुमावलि:** | **तत्पुरुष:** |
| i. सप्तानां पदानां समाहार: | ........................ | ........................ |
| ii. परेषाम् उपकार: | ........................ | ........................ |
| iii. राम: च लक्ष्मण: च | ........................ | ........................ |
| iv. न पेयम् | ........................ | ........................ |
| v. धर्म: च अर्थ: च | ........................ | ........................ |
| vi. काम: च मोक्ष: च | ........................ | ........................ |
| vii. पञ्चानां वटानां समाहार: | ........................ | ........................ |
| viii. मातु: गृहे | ........................ | ........................ |
| ix. न इष्टम् | ........................ | ........................ |
| x. त्रयाणां भुवनानां समाहार: | ........................ | ........................ |
| xi. लाभ: च अलाभ: च | ........................ | ........................ |

© NCERT not to be republished